# WEST BENGAL STATE UNIVERSITY

B.A. Honours/Programme 3rd Semester Examination, 2020, held in 2021

## SANHGEC03T/SANGCOR03T-SANSKRIT (GE3/DSC3)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः – 2×5 = 10

(क) स्वप्नवासवदत्तमित्यस्य का व्युत्पत्तिः ?

(ख) स्वप्नवासवदत्तमिति नाटकस्य नायिका का ? सा च कीदृशी नायिका ?

(ग) स्वप्नवासवदत्तमिति नाटकस्य कति स्त्रीपात्राणि सन्ति ? कानि च तानि ?

(घ) 'तपोवनानि नाम अतिथिजनस्य स्वगेहम्' – अस्याः उक्तेः वक्ता कः ? उक्तेः तात्पर्यं किम् ?

(ङ) स्वप्नवासवदत्तमिति नाटकस्याङ्गी रसः कः ? अस्य च रीतिः का ?

(च) 'दत्तं वेतनमस्य परिखेदस्य' – उद्धृतोक्तेः वक्ता कः ? तस्य एवं परिखेदस्य कारणं किम् ?

(छ) उदयनस्य वीणायाः नाम किमासीत् ? सा च कस्याः प्रिया आसीत् ?

### SECTION-B

2. यथाभिमतं प्रश्नद्वयस्य उत्तरं लेख्यम् – 10×2 = 20

(क) अभिज्ञानशकुन्तलमिति नाटकस्य हस्तिवृत्तान्तस्य नाटकीयतात्पर्यं विचार्यताम्।

(ख) अभिज्ञानशकुन्तलमिति नाटकस्य चतुर्थाङ्कस्य श्रेष्ठत्वं प्रतिपाद्यताम्।

(ग) शकुन्तलायाः चारित्रिकवैशिष्ट्यं प्रतिपाद्यताम्।

(घ) अभिज्ञानशकुन्तलमिति नाटके कालिदासस्य यन्नैसर्गिकं प्रेम प्रतिफलितं तद्वर्ण्यताम्।

3. अधोलिखितेषु चत्वारः प्रश्नाः समाधेयाः। तेषु एकः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 5×4 = 20

(क) इदं किलाव्याजमनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥ इति व्याख्येयम्।

(ख) असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रवृत्तयः॥ इति व्याख्येयम्।

(ग) विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥ इति व्याख्येयम्।

(घ) 'प्रस्तावना' इत्यवलम्ब्य टीका लेख्या।

(ङ) 'सूत्रधारः' इति विषयमवलम्ब्य टिप्पनी करणीया।

(च) 'दुष्यन्तः' – इति विषयमवलम्ब्य टीका लेख्या।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

উত্তরপত্র জমা দেবার ইমেল আইডি: scm.sans.sc@gmail.com